वस्तुमात्रं पित्तदोषेणाम्लरसतां नीयते तस्मिन् रोगभेदे ।

**अम्लपूर** न० अम्लेन अम्लरसेन पूर्य्यते पूर-कर्म्मणि घञ् ६त० । वृक्षाम्ले (तेतुल) राजनि० ।

**अम्लफल** पु० अम्लं फलं यस्य । (तेतुल) इतिख्याते वृक्षाम्ले ।

**अम्लबन्धग्रा** स्त्री बन्ध-कर्म्मणि ण्यत् । अम्लसम्बद्धे कन्दभेदे ।

**अम्लभेदन** पु० अम्लार्थं भिद्यतेऽसौ कर्म्मणि ल्युट् । अम्लवेतसे

**अम्लरस** पु० अम्लो रसः । अम्ले रसे । २तद्वति त्रि० ।

**अम्लरुहा** स्त्री अम्लाय रोहति रुह-क । मालवजनागवल्ल्याम्

**अम्ललोनि(णि)का** स्त्री अम्लं रसं लाति गृह्णाति अम्लल: तमूनयति अत्युग्राम्लत्वात् हीनयति ऊन-ण्वुल् पृ० णत्वम् । (आमरुल) इति ख्याते लताभेदे । अम्लोनीप्यत्र ।

**अम्लवती** स्त्री अम्लो रसो विद्यतेऽस्याः अम्ल+रसा० मतुप् मस्यवत्वम् । (आमरुल) ख्याते लताभेदे ।

**अम्लवर्ग** पु० अम्लरसप्रधानानां वर्गः । सुश्रुतोक्ते अम्लरस-प्रधानद्रव्ये । तच्च अम्लशब्दे ३३३ पृष्ठे दृश्यम् ।

**अम्लवल्ली** स्त्री अम्लरसवती वल्ली । त्रिपर्णिकानामकन्दभेदे

**अम्लवाटिका** स्त्री अम्लस्य वाटिका स्थानमिव । नागवल्ली भेदे । पित्तरक्तप्रकोपकरत्वेन तत्स्थानत्वात् तथात्वम् ।

**अम्लवास्तूक** पु० अम्लरसान्वितो वास्तूकः शाकभेदः । (चुक-पालङ्) इति ख्याते चुक्रे ।

**अम्लवीज** न० अम्लस्य वीजं कारणम् । (तेतुल) वृक्षाम्ले ।

**अम्लवृक्ष** न० अम्लरसोवृक्षो यस्य । (तेतुल) वृक्षाम्ले

**अम्लवेतस** पु० अम्लावेतस इव नम्रस्य । (चुका) ख्याते चुक्रे

**अम्लशाक** पु० अम्लः शाको यस्य । (चुका) इति १ ख्याते चुक्रे । २ अम्लप्रधाने शाकाम्ले पु० ।

**अम्लसार** पु० अम्लोरसएव सारः प्रधानं यस्य । १ चुक्रे २निम्बुके, ३हिन्ताले च । ४ काञ्जिके न० । [ख्याते वृक्षे

**अम्लहरिद्रा** स्त्री अम्लरसान्विता हरिद्रा । (आमहरिद्रा)

**अम्ला** स्त्री अम्लो विद्यतेऽस्या अर्श आद्यच् । तिन्तिड्याम् ।

**अम्लाङ्कुश** पु० अम्लम् अङ्कुशाकारमग्रं यस्य । चुक्रे ।

**अम्लातक** पु० न म्लायति म्लै-तन् न०त० । अम्लवेतसे ।

**अम्लादन** पु० अद्यते अद-कर्म्मणि ल्युट् कर्म्म० । कुरण्टकवृक्षे ।

**अम्लान** पु० म्लै-क्त न०त० । आव्ला इति ख्याते महा-सहावृक्षे । २ म्लानभिन्ने त्रि० । "अम्लानपङ्कजां मालां शिरस्युरसि चापराम्" देवी० । ३ पद्मे न० । [न्याम् ।

**अम्लानिनी** स्त्री अम्लानानां पद्मानां समूहः इनि । पद्मि-

**अम्लिका** स्त्री अम्लैव स्वार्थे कन् । १तिन्तिड्याम् । अत्वाम्लीके-त्यपि सा च २ पलाशीलतायां ३ श्वेताम्लिकायां ४ क्षुद्रा-म्लिकायाञ्च राजनि० । अम्लोस्त्यत्र उद्गारे वा ठन् । १ अम्लोद्गारे मेदि० ।

**अम्लिकावटक** पु० अम्लिकाया वटकः । भावप्रकाशोक्ते (अम्ल वड़ी) इति ख्याते वटकभेदे यथा "अम्लिकां स्वेदयित्वा तु जलेन सह मर्द्दयेत् । तन्नीरे कृतसंस्कारे वटकान् मज्जयेत् पुनः । अम्लिकावटकास्ते तु रुच्यवह्निप्रदीपनाः" भा०प्र० ।

**अम्ली** स्त्री अम्ल+गौ० ङीष् । चाङ्गेर्य्याम् (आमरुल) ।

**अम्लोटक** पु० अम्लम् उठं पत्रं यस्य । (अम्लकुचा) इति अश्मन्तकवृक्षे ।

**अम्लोद्गार** पु० अम्लस्य उद्गारः । अम्लरसमूचके उद्गारे ।

**अय** गतौ भ्वा० आ०सक० सेट् । अयते आयिष्ट अयाम्बभूव अयामास अयाञ्चक्रे । अस्य परस्मैपदित्वमपि "अय मुदयति मुद्राभञ्जनः पद्मिनीनामित्युद्भटः "शुचोदयन् दीधितिमुक्थशासः यजु० १८ ६८ । "उदयति विततो-र्द्ध्वरश्मिः" माघः ।

**अय** पु० एति सुखमनेन इण्-करणे अच् । १ प्राक्तने शुभ-कर्म्मणि, २शुभदायके-दैवे "स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णि-रयान्वितः" रघुः "तव धर्म्मः सदयोदयोज्ज्वलः" नै० ३विधाने च । अयते जयमनेन । ४कपर्द्दकरूपे एकाद्यङ्कयुक्ते द्यूतसाधने ५पाशके च "अथास्मै पञ्चाक्षान् पाणावावपति अभिभूरस्येतास्ते पञ्च दिशः कल्पन्तामित्येष वा अयानभि-भूर्यत्कलिरेष हि सर्वानयानभिभवति" इति शत०ब्रा० । "अक्षा नाम कपर्द्दकाः सुवर्णनिर्म्मिता, विभीतफलानि सौवर्णानि वा । ते चाक्षा द्यूतकाले निवपनीयाः । तेषां चतुर्णामङ्कानां कृतसंज्ञा पञ्चानां कलिसंज्ञा तथा च शाखान्तरे स्तोमसंस्थायां कृतादिव्यवहारः कृतः "ये वै चत्वारः स्तोमाः कृतं तत्" अथ ये पञ्च कलिः इति" यदा पञ्चाप्यक्षा उत्ताना भवन्ति तदा देवि-तुर्जयोभवति पञ्चसु त्वेकरूपासु जय एव भविष्यतीत्यन्य-त्रोक्तम् । अयशब्दः अक्षवाची" इति भा० । चतुरङ्का-न्विते ६ पाशकभागे च । "यथा कृताय विजितायाधरेयाः संयन्ति" छा०उ० "कृतो नाम अयोद्यूत समये प्रसिद्धश्चतुरङ्कः स यदा जयति द्यूते प्रवृत्तानां, तस्मै विजिताय तदर्थमितरे त्रिद्व्येकाङ्का अधरेयाः त्रेताद्वापरकलिनामानः संयन्ति सङ्गच्छन्ते अन्तर्भवन्ति चतुरङ्के कृताङ्के त्रिद्व्येकाङ्कानां विद्यमानत्वादन्तर्भवन्तीति" भा० । "द्यूतस्य समयः सङ्केतस्तदनुष्ठानसमयो वा येन द्यूतविद्यायां जीयते सोऽक्षस्य कश्चिद्भागोऽयशब्दवाच्यः स